# 2019

# Part – II

# SANSKRIT

## (Honours)

## Paper – V

*Full Marks – 90*

*Time : 4 Hours*

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answers wherever necessary.*

1. वैदिकदेवतारूपेण अग्नेः माहात्म्यमुपस्थाप्यताम् । 10

*अथवा*

देवीसूक्ते प्रतिफलिता दार्शनिकभावना परिस्फुटनीया ।

2. सायणभाष्यरीत्या सुरगिरा देवनागर्य्यां लिप्यां च कस्यचिदेकस्य मन्त्रस्य ऋषिच्छन्दोदेवताविनियोगनिर्देशपुरःसरं व्याख्या कार्याह्न– 6

(i) अग्निना रयिमश्नवत्
पोषमेव दिवेदिवे ।
यशसं वीरवत्तमम्

P.T.O.

(ii) यः पृथिवीं व्यथमानामदृंहद्

यः पर्वतान् प्रकुपिताँ अरम्णात्।

यो अन्तरिक्षं विममे वरीयो

यो द्यामस्तभ्नात् स जनास इन्द्रः ॥

3. अधस्तनयोः काचिदन्यतरा भाष्यपङ्क्तिः सुरगिरा देवनागरीलिप्या च व्याख्येया ह्ल– 6

(i) अग्नीषोमप्रणयने 'उप त्वाग्ने' इत्यादिकोऽनु-वचनीयस्तृचः ।

(ii) वरुणप्रघासेषु कायस्य हविषो हिरण्यगर्भो इत्येषा याज्या ।

4. द्वितीय-प्रश्नस्थितयोः मन्त्रयोः कस्यचिदेकस्य मन्त्रस्य पदपाठः विधेयः । 4

5. अधोलिखितानां पदानां यथेप्सितं द्वयोः व्याकरणगता टिप्पणी कार्या – 2×2

रत्नधातमम्, संजभार, जनासः, आगमत् ।

6. मनुमत्स्यकथायाः उत्सः कः भवति ? स च आख्यानभागः संक्षेपतः आलोचनीयः । 5

7. (क) उपनिषच्छब्दस्य कोऽर्थः ? ईशोपनिषदः उत्सः कः भवति ? संक्षेपतः ईशोपनिषदः शिक्षा पर्यालोचनीया । 10

*अथवा*

का नाम विद्या ? का च अविद्या ? ईशोपनिषदनुसारं विद्याविद्ययोः सरूपं प्रतिपादनीयम् ।

(ख) अधोलिखितयोः मन्त्रयोः कस्यचिदेकस्य व्याख्या सुरगिरा देवनागरीलिप्या च कार्या ह्व– 6

(i) तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।

तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ।

(ii) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।

ततो भूय इव ते तमो य उ विद्यायां रता : ।।

(ग) अधोलिखितेषु प्रश्नेषु यथेप्सितं चतुर्णामुत्तरं सुरगिरा देवनागरीलिप्या च प्रदेयम् ह्व– 1×4

(i) ईशोपनिषदः इति नामकरणं कथं जातम् ?

(ii) सम्भूतिशब्दस्य कोऽर्थः ?

(iii) आत्महनः जनाः के भवन्ति ?

(iv) 'नान्यथेतोऽस्ति' पदे सन्धिविच्छद कार्यः ।

(v) 'मातरिखा' शब्दस्य कोऽर्थ ?

(vi) ईशोपनिषदः अन्तिमे मन्त्रे कश्च देवः उल्लिखितः ?

8. (क) कस्यचिदेकस्य प्रश्नस्य उत्तरं दीयताम् ह्व– 10

(i) वेदे क्रियायाः अभिप्रायभावस्य (लेट् लकारस्य) प्रयोगः प्रदर्शनीयः ।

(ii) वैदिकसन्धिविधेः वैचित्र्यं वर्ण्यताम् ।

(ख) ससूत्रं यथेच्छं द्वयोः पदयोः व्याकरणदिशा स्वरसाधनप्रक्रिया प्रदर्शनीया – $2\frac{1}{2}\times 2$

सचस्वा, क्रन्दसी, मादयन्ति, दिवेदिवे ।

9. अथर्ववेदस्य विषयवैचित्र्यं प्रतिपाद्यताम् । 10

*अथवा*

ऋग्वेदीयसंवादसूक्तानां परिचयः प्रदेयः ।

10. (क) कस्यचिदेकस्य टीका कार्या – 5

बृहद्देवता, निरुक्तम्, गोपथब्राह्मणम्, कठोपनिषद् ।

(ख) अधस्तनेषु प्रश्नेषु यथेप्सितं पञ्चानाम् उत्तरं सुरगिरा देवनागर्य्या लिप्पा च प्रदेयम् ह्न– 1×5

(i) कस्य वेदस्य आरण्यकं नास्ति ?

(ii) पदपाठकारः कः ?

(iii) देवता का भवति ?

(iv) प्रचयस्वरः कदा भवति ?

(v) गायत्रीच्छन्दसि प्रतिपादे कियन्तः अक्षराः सन्ति ?

(vi) प्रातिशाख्यं किम् ?

(vii) शुल्वसूत्रस्य विषयः कोऽस्ति ?

———————